धान्यराश्याद्यौ त्रि० प्रस्थेन क्रीतम् ठञ् । ७प्रस्थेन क्रीते त्रि० स्त्रियां ङीप् । प्रस्थस्य निमित्तं संयोग उत्पातो वा ठञ् । प्रस्थस्य ८निमित्ते ९संयोगे १०उत्पाते वा ।

**प्राह्व** पु० प्रकर्षेण आह्वेति शब्दोऽत्र । नृत्योपदेशे शब्दमा०।

**प्राह्ण** पु० प्रारम्भोऽह्नः प्रा०स०अच्समा० अह्नादेशः णत्वञ्च । त्रिधाविभक्तदिनस्य पूर्वभागे १पूर्वाह्णे अमरः । प्रकृष्टम-ह्नर्यत्र तिष्ठद्गु० अव्ययी० । २प्रकृष्टदिनयुते अव्य० ।

**प्राह्णेतन** त्रि०प्राह्णे भवः ट्यु ट्युट् च निएदन्तत्वम् । पूर्वा-ह्णभवे स्त्रियां ङीप् ।

**प्राह्णेतरा(मा)म्** अव्य० अतिशयेन प्राह्णे तरप् तमप् वा आम् घकालेत्यादिना सप्तम्या अलुक् । अत्यन्तप्रातःकाले इत्यर्थे ।

**प्रिय** त्रि० प्रीणाति प्री-तर्पणे क । १भर्त्तरि पत्यौ अमरः २भार्य्यायां स्त्री । ३प्रियके मृगभेदे पुं०स्त्री जटा०४ऋद्धि-नामौषधौ ५हृद्ये त्रि० मेदि० । ६जीवकौषधौ राजनि० ।

**प्रियंवद** त्रि०प्रियं वदति वद-खच् मुम् । १प्रियकरवादिनि मधुरभाषिणि । २खेचरे ३गन्धर्वभेदे पु० शब्दमा० वदेर-न्तःस्थवादित्वात् प्रियम्वदेति मयुक्तशब्दकल्पनं प्रामा-णिकमेव । "भुवि भवेन्नभजरैः प्रियंवदा" वृ०र० उक्ते द्वादशाक्षरपादके ४छन्दोभेदे स्त्री । ५शकुन्तलासहचरी-भेदे स्त्री शकु० दृश्यम् ।

**प्रियक** पु० प्रिय+स्वार्थे क संज्ञायां कन् वा । १पीतसा-लके (पियाशाल) २नीपे ३चित्रमृगे ४भ्रमरे ५प्रियङ्गौ ६कुङ्कुमे मेदि० ७धाराकदम्बे ८असनवृक्षे राजनि० । ९स्कन्दानुचरभेदे भा०श० ४६अ० । तस्यापत्यं विदा० अञ् । प्रैयक चित्रमृगापत्ये पुंस्त्री० ।

**प्रियकृत्** त्रि० प्रियं करोति कृ-क्विप् तुक् । १प्रियकारिणि २विष्णौ पु० "प्रियकृत् प्रीतिवर्द्धनः" विष्णुस० ।

**प्रियङ्कर** त्रि० प्रियं करोति कृ-खच् मुम् । १प्रियकारिणि २श्वेतकण्टकार्य्यां ३दृग्ज्जीवन्त्याम् ४अश्वगन्धायाञ्च स्त्री राजनि० गौरा० ङीष् ।

**प्रियङ्करण** त्रि० अप्रियं प्रियं करोत्यनेन कृ-करणे ख्युन् । अप्रियस्य प्रियताकरणसाधने ।

**प्रियङ्गु** स्त्री प्रिय+गम-डु नि० मुम् च । १स्वनामख्याते वृक्षे अमरः "प्रियङ्गुः शीतला तिक्ता तुवरानिलपित्तहृत् । रक्तादियोगदौर्गन्ध्यस्वेददाहज्वरापहा । गुल्मतृड्-विषमोहघ्नी तद्वद्गन्धप्रियङ्गुका । तत्फलं मधुरं रूक्षं कषायं शीतलं गुरु । विबन्धाध्मानबलकृत् संग्राहि कफपित्तजित्" भावप्र० । "प्रियङ्गुकलिकारम्" इति बुध-प्रणाममन्त्रः । २राजिकायां राजनि० ३पिप्पल्याम् ४कङ्गौ (काङ्गनी) धान्ये मेदि० ५कटुक्यां धरणिः । [लमणिः ।

**प्रियजन** पु०कर्म० । १हृद्ये जने । २प्रौढभावानुविद्धे उज्ज्व-

**प्रियजीव** पु०प्रियो जीवो यस्मिन् । श्योनाकवृक्षे राजनि० ।

**प्रियतम** पु० अतिशयेन प्रियः तमप् । १मयूरशिखावृक्षे २अतिप्रिये त्रि० शब्दच० ।

**प्रियता** स्त्री प्रियस्य भावः तल् । १स्नेहे २प्रेमणि अमरः । त्व । प्रियत्व तत्रार्थे न० शब्दर० ।

**प्रियतोषण** त्रि० प्रियं तोषयति तुष-णिच् ल्यु । १प्रियस-न्तोषकारके "नारीपादौ स्वहस्तेन धारयेत् जघनोपरि । स्तनापीड़करः कामी कामयेत् प्रियतोषणः" रतिमञ्ज-र्य्युक्ते २रतिबन्धभेदे ।

**प्रियदत्ता** स्त्री दीयमानपृथिव्याम् "नामास्याः प्रियदत्तेति गुह्यं देव्याः सनातनम् । दाने वाऽप्यथ वाऽऽदाने ना-मास्याः प्रथमं प्रियम् । य एतां विदुषे दद्यात् पृथिवीं पृथिवीपतिः । पृथिव्यामेतदिष्टं स राजा राज्यमितो व्रजेत्" भा०अनु० ६२अ० ।

**प्रियदर्शन** पु० प्रियं दर्शनमस्य । १क्षीरिकावृक्षे २शुकखगे च जटा० ३सुदृश्ये त्रि० । [हेमच० ।

**प्रियप्रायस्** न० प्रियस्य प्रायः बाहुल्यं यत्र । प्रियवाक्ये

**प्रियप्रेप्सु** त्रि० ७त० । इष्टार्थोद्युक्ते जटा० । [प्रिये त्रि० ।

**प्रियमधु** पु०प्रियं मधु मद्यं यस्य । १बलरामे हेमच० २मद्य-

**प्रियमाल्यानुलेपन** त्रि० प्रियं माल्यमनुलेपनं च यस्य । १माल्यानुलेपनप्रिये २स्कन्दानुचरभेदे पु०भा०श० ४६अ० ।

**प्रियमेध** पु० १अजमीढस्य पुत्रभेदे "अजमीढस्य वंश्याः स्युः प्रियमेधादयो द्विजाः" भाग० ९।२१।१७श्लो० । २यज्ञो-पेते ऋषिभेदे ऋ० १।४५।४ भा० ।

**प्रियम्भविष्णु** त्रि०अप्रियः प्रियो भवति भू-कर्त्तरि खिष्णुच् । अप्रिये प्रिये भवितरि । खुकञ् प्रियम्भावुक तत्रार्थे त्रि० ।

**प्रियरूप** त्रि०प्रियं रूपमस्य । १हृद्यरूपे । तस्यभावः मनोज्ञा० वुञ् । प्रैयरूपक तस्य भावे न० । कर्म० । २हृद्ये रूपे न० ।

**प्रियवचन** त्रि०प्रियं वचनं वैद्यकवचनं वा यस्य । १प्रियवा-दिनि वैद्यकोक्तवाक्ये भक्तिमति २रोगिणि राजनि० । कर्म० । २हृद्ये वाक्ये न० ।

**प्रियवर्णी** स्त्री प्रियो वर्णो यस्याः गौरा० ङीष् । प्रियङ्गौ जटाधरः । [लतायाञ्च ।

**प्रियवल्ली** स्त्री नित्यकर्म० । १प्रियङ्गौ राजनि० २हृद्यायां